**अश्मभाल** न० अश्मेव भाजयति चूर्णितं करोति। भज-णिच् अण् पृषो० जस्य लत्वम्। द्रव्यचूर्णकारके (हामानदिस्ते) इति ख्याते लौहपात्रभेदे शब्दचन्द्रिका।

**अश्मभिद्** पु० अश्मानमुद्भिद्य जायते। पाषाणभेदके वृक्षे। क, अश्मभिदः। अण् अश्मभेदः। ण्वुल्। अश्मभेदकोऽप्यत्र पु०।

**अश्मयोनि** पु० अश्मा योनिरस्य। मरकतमणौ।

**अश्मर** त्रि० अश्म–चतुरर्थ्याम् र। प्रस्तरसंबन्धिनि।

**अश्मरथ** पु० अश्मेव दुर्भेदो रथोऽस्य। ऋषिभेदे गर्गा० यञ्। आश्मरथ्यः। "अभिव्यक्तेरित्याश्मरथ्यः" शा० सू०

**अश्मरी** स्त्री अश्मानं राति रा–क गौरा० ङीष्। मूत्रकृच्छ्र-रोगे स हि मूत्रद्वारा प्रस्तरमिव कठिनमांसं रेचयति इति तस्य तथात्वम्। तन्निदानादि सुश्रुते उक्तं यथा। "अथातोऽश्मरीणां निदानं व्याख्यास्यामः ॥ चतस्रोऽश्मर्य्यो भवन्ति श्लेष्माधिष्ठानास्तद्यथा श्लेष्मणा वातेन पित्तेन शुक्रेण चेति ॥ तत्रासंशोधनशीलस्यापथ्यकारिणः प्रकुपितः श्लेष्मा मूत्रसम्पृक्तोऽनुप्रविश्य वस्तिम्, अश्मरीं जनयति तासां पूर्व्वरूपाणि वस्तिपीड़ारोचकौ मूत्रकृच्छ्रं वस्तिशिरोमुष्कशेफसां वेदना कृच्छ्रा ज्वरावसादौ वस्तगन्धित्वं मूत्रस्येति ॥ यथास्वं वेदनावर्णं दुष्टं सान्द्रमथाविलम्। पूर्व्वरूपेऽश्मनः कृच्छ्रान्मूत्रं सृजति मानवः ॥ अथ जातासु नाभिवस्ति-सेवनीमेहनेष्वन्यतमे मेहतोवेदना मूत्रधारासङ्गः सरुधिरमूत्रता मूत्रविकिरणञ्च गोमेदं प्रकाशमनाविलं ससिकतं विसृजति धावनलङ्घनप्लवनपृष्ठयानाध्वगमनैश्चास्य वेदना भवति ॥ तत्र श्लेष्माश्मरी श्लेष्मलमन्नमभ्यवहरतोऽत्यर्थमुपलिप्याधः परिवृद्धिं प्राप्य वस्तिमुखमधिष्ठाय स्रोतो निरुणद्धि तस्य मूत्रप्रतिघाताद्दाल्यते भिद्यते निस्तुद्यत इव वस्तिर्गुरुः शीतश्च भवति। अश्मरी चात्र श्वेता स्निग्धा महती कुक्कुटाण्डप्रतीकाशा मधूकपुष्पवर्णा वा भवति तां श्लैष्मिकीमिति विद्यात् ॥ पित्तयुक्तस्तु श्लेष्मा सङ्घातमुपगम्य यथोक्तां परिवृद्धिं प्राप्य वस्तिमुखमधिष्ठाय स्रोतो निरुणद्धि तस्य मूत्रप्रतिघातादुष्यते चूष्यते दह्यते पच्यत इव वस्तिरुष्णवातश्च भवति। अश्मरी चात्र सरक्ता पीतावभासा कृष्णा भल्लातकास्थिप्रतिमा मधुवर्णा वा भवति तां पैत्तिकीमिति विद्यात् ॥ वातयुक्तस्तु श्लेष्मा सङ्घातमुपगम्य यथोक्तां परिवृद्धिं प्राप्य वस्तिमुखमधिष्ठाय स्रोतो निरुणद्धि तस्य मूत्रप्रतिघातात्तीव्रा वेदना भवति तथात्यर्थं पीड्यमानो दन्तान् खादति नाभिं पीड़यति मेढ्रं मृद्नाति पायुं स्पृशति विशर्द्धते विदहति वातमूत्रपुरीषाणि कृच्छ्रेण वास्य मेहतो निःसरन्ति। अश्मरी चात्र श्यामा परुषा विषमा खरा कदम्बपुष्पवत्कण्टकाचिता भवति तां वातिकीमिति विद्यात्। प्रायेणैतास्तिस्रोऽश्मर्य्यो दिवास्वप्नसमशनाध्यशनशीतस्निग्धगुरुमधुराहारप्रियत्वाद्विशेषेण बालानां भवन्ति। तेषामेवाल्पवस्तिकायत्वादनुपचितमांसत्वाच्च वस्तेः सुखग्रहणाहरणा भवन्ति ॥ महतान्तु शुक्राश्मरी शुक्रनिमित्ता भवति। मैथुनाभिघातादतिमैथुनाद्वा शुक्रञ्चलितमनिर्गच्छद्विमार्गगमनादनिलोऽभितः संगृह्य मेढ्रवृषणयोरन्तरे संहरति संहृत्य चोपशोषयति सा मूत्रमार्गमावृणोति मूत्रकृच्छ्रं वस्तिवेदनां वृषणयोश्च श्वयथुमापादयति पीड़ितमात्रे च तस्मिन्नेव प्रदेशे प्रविलयमापद्यते तां शुक्राश्मरीमिति विद्यात् ॥ भवन्ति चात्र ॥ शर्करा सिकता मेहो भस्माख्योऽश्मरिवैकृतम् ॥ अश्मर्य्याः शर्करा ज्ञेया तुल्यव्यञ्जनवेदना ॥ पवनेऽनुगुणे सा तु निरेत्यल्पा विशेषतः। सा भिन्नमूर्त्तिर्वातेन शर्करेत्यभिधीयते ॥ हृत्पीड़ासक्थिसदनं कुक्षिशूलः सवेपथुः। तृष्णोर्द्ध्वगोऽनिलः कार्ष्ण्यं दौर्ब्बल्यं पाण्डुगात्रता ॥ अरोचकाविपाकौ तु शर्करार्त्ते भवन्ति च। मूत्रमार्गप्रवृत्ता सा सक्ता कुर्य्यादुपद्रवान् ॥ दौर्ब्बल्यं सदनं कार्श्यं कुक्षिशूलमरोचकम्। पाण्डुत्वमुष्णवातञ्च तृष्णां हृत्पीड़नं वमिम्॥ नाभिपृष्ठकटीमुष्कगुदवङ्क्षणशेफसाम्। एकद्वारस्तनुत्वक्को मध्ये वस्तिरधोमुखः ॥ अलाब्वा इव रूपेण सिरास्नायुपरिग्रहः। वस्तिर्व्वस्तिशिरश्चैव पौरुषं वृषणौ गुदम् ॥ एकसम्बन्धिनो ह्येते गुदास्थिविवरस्थिताः। मूत्राशयो मलाधारः प्राणायतनमुत्तमम् ॥ पक्वाशयगतास्तत्र नाड्यो मूत्रवहास्तु याः ॥ तर्पयन्ति सदा मूत्रं सरितः सागरं यथा ॥ सूक्ष्मत्वान्नोपलभ्यन्ते मुखान्यासां सहस्रशः। नाडीभिरुपनीतस्य मूत्रस्यामाशयान्तरात् ॥ जाग्रतः स्वपतश्चैव स निःष्यन्देन पूर्य्यते। आमुखात्सलिले न्यस्तः पार्श्वेभ्यः पूर्य्यते नवः ॥ घटो यथा तथा विद्धि वस्तिर्मूत्रेण पूर्य्यते। एवमेव प्रवेशेन वातः पित्तं कफोऽपि वा ॥ मूत्रयुक्त उपस्नेहात् प्रविश्य कुरुतेऽश्मरीम्। अप्सु स्वच्छास्वपि यथा निषिक्तासु नवे घटे ॥ कालान्तरेण पङ्कः स्यादश्मरीसम्भवस्तथा। संहन्त्यपो यथा दिव्या मारुतोऽग्निश्च वैद्युतः ॥ तद्वद्बलासं वस्तिस्थमूष्मा संहन्ति सानिलः। मारुते प्रगुणे वस्तौ मूत्रं सम्यक् प्रवर्त्तते ॥ विकारा विविधाश्चापि प्रतिलोमे भवन्ति हि ॥ मूत्राघाताः प्रमेहाश्च शुक्रदोषास्तथैव च। मूत्रदोषाश्च ये केचिद्वस्तावेव भवन्ति हि" सुश्रु० 'अश्मरीं चूर्ण-